# प्रार्थना संग्रह

## विष्णुवन्दना

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

## त्वमेव सर्वम्

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

## विष्णुप्रार्थना

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरीरुहेक्षणम् ।
सहारवक्षस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥

## दाँत माभ्दा पढ्ने

मुखदुर्गन्धनाशय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥

## तीर्थावाहन

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिं कुरु ॥

## गंगाप्रार्थना

नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरुपम् ।
भुक्तिं च मुक्ति च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥

## हरिहरस्तुती

यौ तौ शंखकपालभूषितकरौ मालाऽस्थिमालाधरी
देवौ द्वारवतीश्मशननिलयौ नागारिगोवाहनौ ।
द्विव्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ
पापं मे हरतां सदा हरिहरौ श्रीवत्सगङ्गाधरौ ॥

## एकश्लोकी महाभारत

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्
द्यूते श्रीहरणं वने विचरणं मत्स्यालये वर्तनम् ।
लीलागोग्रहणं रणे विहरणं सन्धिक्रियाजृम्भणम्
पश्चाद् भीष्मसुयोधनादि हननं एतन्महाभारतम् ॥

## क्षमाप्रार्थना

त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्पितम् ।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥
मन्त्रहीनं क्रियाहिनं भक्तिहीनं सुरेश्वर ।
जपहोमञ्च नोहित क्षम्यतां परमेश्वर ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यतां देव ! प्रसीद परमेश्वर ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिःस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

## दुःस्वप्ननाशन

विष्णुं नारायणं कृष्णं माधवं मधुसूदनम् ।
हरिं नरहरिं रामं गोविन्दं दधिवामनम् ॥

## महापातकनाशन

अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा ।
पञ्चकं संस्मरेन्नित्यं महापातकनाशनम् ॥

## रक्षाप्रार्थना

जले रक्षुतु वाराहः स्थले रक्षतु वामनः ।
अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥
जले रक्षतु नन्दीशः स्थले रक्षतु भैरवः ।
अटव्यां वीरभद्रश्च सर्वतः पातु शङ्करः ॥

## सौभाग्य वृद्धिका लागि

उमा उषा च वैदेही रमा गङ्गेति पञ्चकम् ।
प्रातरेव पठेन्नित्यं सौभाग्यं वर्धते सदा ॥

## चिरायु र आयोग्यका निमित्त

अश्वत्थामा बलिर्व्यासी हनुमाँश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद् वर्षशतं सोऽप सर्वव्याधिविवर्जितः ॥

## धनवान् बन्नका लागि

वाराणस्यामुत्तरे तु सुमन्तुर्नाम वै द्विजः ।
तस्य स्मरणमात्रेण निर्धनी धनवान् भवेत् ॥

## दीपदर्शन

शुभं भवतु कल्याणमारोग्यं सुखसंपदाम् ।
मम शत्रुर्विनाशाय दीपज्योतिर्नमोऽस्तु ते ॥
दीपज्योतिः परं ब्रह्म दीपज्योतिर्जनार्दनः ।
दीपयो पापं सन्ध्यादीपं नमोऽस्तु ते ॥

## स्नानपछि नामोच्चारण

मंगलं भगवान् विष्णुमं गलं गरुडध्वजः ।
मंगलं पुण्डरीकाक्षो मंगलायतनो हरिः ॥
अच्युतानन्तगोविन्द नामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥
आदित्यो द्रौपदी विष्णुर्दण्डपाणिर्महेश्वरः ।
पंचैतान् संस्मरेन्नित्यं सर्वपापैः प्रमुच्यते ॥

**हस्तदर्शन** (हात हेरी पढ्ने)

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥

**पृथ्वी छोई पढ्ने**

समुद्रमेखले देवी पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

**गणेशप्राथना**

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥

**सूर्यस्तोत्र**

जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो । आदित्याय नमो नमः ॥

**दुर्गावन्दना**

या देवी सर्वभूतेषु शक्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

**शिवनमस्कार**

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

### आफ्नो धर्मानुसार यथाशक्ति जप गर्ने

जस्तैः– शिवमार्गीाको लागि
ऊँ नमः शिवाय
विष्णुमार्गीको लागि
ऊँ नमो भगवते वासुदेवाय
बुद्धमार्गीको लागि
ऊँ नमो बुद्धाय

(इच्छा अनुसार अन्य देवी देवताको जप गर्ने)

### सूर्यलाई अर्घ दिंदा भन्ने

एहि सूर्य सहस्रांशो तेजोराशे जगतपते ।
अनुकम्पय मां भक्त्या गृहाणर्ध्यं दिवाकर ॥

### परमात्मनस्तुति

यं ब्रह्मावरुणेन्द्ररुद्रमरुतस्तुन्वन्ति दिव्यैस्तवै-
वेदैः सांगपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेनमनसा पश्यन्ति यं योगिनो
यस्याऽन्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

**प्रार्थना सग्रहका संग्रहकर्ता श्री हरिमान श्रेष्ठज्यूमा हार्दिक आभार व्यक्त गर्दछौं ।**

**सेवक समूह**

मुल पाता